International Journal of Creative and Open Research in Engineering and Management
ISSN: **3108-1754 (Online)**
Volume 02 Issue 06 June-2026 | Impact Factor: 3.5

# चिदानन्दभिक्षुकृतगीतगोविन्दटीकायामुल्लिखितानां लौकिकन्यायप्रयोगानामेकमनुशीलनम्

**सुशोभनसिंहमहापात्रः**

शोधच्छात्रः

केन्द्रीय-संस्कृत-विश्वविद्यालयः

श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

दूराभाषसंख्या- 8101312824

अणुवाक्संख्या- susobhansinhamahapatra@gmail.com

**How to Cite this Article**:

सुशोभनसिंहमहापात्रः, (2026). चिदानन्दभिक्षुकृतगीतगोविन्दटीकायामुल्लिखितानां लौकिकन्यायप्रयोगानामेकमनुशीलनम्. International Journal of Creative and Open Research in Engineering and Management, <i>02</i>(6). https://doi.org/10.55041/ijcope.v2i6.240

**License:**

This article is published under the terms of the Creative Commons Attribution 4.0 International License (CC BY 4.0), which permits unrestricted use, distribution, and reproduction in any medium, provided the original author(s) and the source are credited.

© The Author(s). Published by International Journal of Creative and Open Research in Engineering and Management.

https://doi.org/ 10.55041/ijcope.v2i6.240

**शोधसार:**

प्रबन्धेऽस्मिन् चिदानन्दभिक्षुविरचितटीकायां प्रयुक्तानां लौकिकन्यायानामनुशीलनात्मकमध्ययनमुपस्थाप्यते। भारतीय-टीकासाहित्ये लौकिकन्यायप्रयोगाः दुरूहानां तत्त्वानां सुलभीकरणाय प्रभावकरं साधनम् इति स्वीकुर्वन्ति टीकाकाराः। विविधाः लोकोपचरिताः लौकिकन्यायस्वरूपाः दृष्टान्ताः टीकाकारैः ग्रन्थार्थस्य स्पष्टीकरणे यथायोग्यं विनियोजिताः दृश्यन्ते। अध्ययनेऽस्मिन् प्रमुखलौकिकन्यायानां परिचयः, तेषां प्रयोगसन्दर्भस्य निरूपणम्, तथा व्याख्यानप्रक्रियायां तेषां कथं प्रयोगः इति सम्यगालोचनमत्र कृतमस्ति। एतेषां न्यायानां साहाय्येन दार्शनिक-भाषिक-रसात्मकविचाराः अधिकतया स्पष्टतां गच्छन्ति इति निष्पद्यते। अत एव निष्कर्षतः वक्तुं शक्यते यत् लौकिकन्यायप्रयोगः टीकायाः व्याख्यानशैलीं सजीवं ग्राह्यं च करोति, तथा पाठकबोधवृद्धौ महत्वपूर्णं योगदानं करोति।

**कूटशब्दाः**

दृष्टान्तः, अभिसारः, पुरुषार्थः, प्रीतिः, देहलीदीपः, सिद्धान्तः, अधिकारी।

## भूमिका

अखिलोऽयं विश्वसंसारः स्वभावसुन्दरः। अस्य सुन्दरता प्रकृतिभूता। परन्तु इयं सुन्दरता साधारणजनानां कल्पनातीता वर्तते। वयं यत्पश्यामः स्वाभाविकं तदेव कमपि सहृदयं निकषा सुन्दरातिसुन्दरम्। नीरसतरुवरपूरतभातीति वत्  कवयः अस्मान् निकषा प्रस्फुटयन्ति।

कथ्यते-

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥

श्रृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।

स चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत्॥[१]

इयं स्फुटनक्षमता तु संस्कारविशेषा वर्तते। संस्कारमन्तरेण काव्यस्योद्भव असम्भवः।काव्यस्य उत्पत्तौ बहुषु कारणेषु सत्स्वपि संस्कारं तु करणत्वेनान्वेति। यथा भामहेन-

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।

काव्यं तु जायते जातु कस्यचित् प्रतिभावतः॥[२]

वाग्विदग्धतां सत्कवित्वेन योजयति भामहः।

विनयेन विना का श्रीः का निशा शशिना विना।

रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता॥[३]

काव्यानामुद्भवः प्रशान्तपावने तपोवने बभूव परन्तु तेषां विकासः राज्ञां प्रसादेनाभूदिति सत्यादनपेतम् । यथा हर्षवर्धनं विना वाणस्य व्यक्तिविकासोऽसम्भवः बभूव। तस्मात् राज्ञामानुकूल्येनैव काव्यं चरमोत्कर्षतां प्रति जगामेति वक्तुं शक्यते।

गीतः स्तुतः गोविन्दः यस्मिन् काव्ये तद्गीतगोविन्दमिति व्युत्पत्या गोविन्दस्य स्तुतिपरकं काव्यं भवति गीतगोविन्दम्। तत्र महाकविः जयदेवः स्वसुन्दरवर्णनशैल्या राधाकृष्णयोः माधुर्यरसमण्डितलीलायाः वर्णनं कृतवान्। तदुपरि बहवः टीकाकाराः ग्रन्थकर्तुः अभिप्रेतार्थं स्वपाण्डित्येन समं स्वीयोत्कृष्टदार्शनिककौशलेन कथितवन्तः। तेषु चिदानन्दभिक्षुः अन्यतमः। अयं टीकाकारः परमवैयाकरणः दर्शनशास्त्राभिज्ञः तथा साहित्य-लोकशास्त्राभिज्ञः वर्त्तते। सः स्वरचितगीतगोविन्दटीकायां पद्यानां व्याख्यानं तथा तदुपरि स्वीयाभिव्यक्तिमपि प्रकटयामास। अस्य वर्णनकौशलं नितरां रमणीयं पाण्डित्यपूर्णं च वर्त्तते। यत्र टीकाकारोऽयं व्याख्यारचनसमये अनेकानां लोकोक्तिनां प्रयोगः कृतवान्। तदेवात्र आलोचयामो वयम्।

**गीतगोविन्दस्य परिचयः**

गीतगोविन्दकाव्यं तु महाकविजयदेवस्य काचित् मौलिकरचनास्ति। श्रीकृष्णचैतन्यमहाप्रभुप्रवर्तितो-न्नतोज्ज्वलरसगर्भभक्तेः भृशं परिवेषणमित्यत्र दरीदृश्यते। यतो हि अत्रैव प्रथमं राधाकृष्णयोः सुललितमाधुर्यमण्डितप्रेमलीलायाः सरसं सुकोमलं च वर्णनं विद्यते। सर्वलीलामुकुटरासलीलायां श्रीगोविन्दस्य त्रैलोक्यसौभगरूपमाधुर्य्यं वेणुगीते स्थावरादीनामानन्दोन्मादनसहकृतेन अनुरागेण श्रीकृष्णं प्रति अभिसारगमनञ्चवर्णितम्। सर्वोऽपि विषयः कामवीजवत् कामगायत्र्यादिवच्च साधकहृदयमुन्मादयति। काव्यमिदं द्वादशसर्गात्मकमस्ति। प्रत्येकेषु सर्गेषु केचन श्लोकाः तथा काश्चनाष्टपद्यः वर्तन्ते। येषु अष्टपद्यः तु प्रधानं श्लोकास्तु कथासूत्रमग्रे सारयन्ति। इत्यत्र चतुर्विंशतिगीतानि सन्ति। यानि भिन्नेषु तालरागेषु च गीयन्ते। यथा प्रथमस्थं दशावतारस्तोत्रात्मकं गीतं मालवरागेण तथा रूपकतालेन गीयते। एवमेव द्वितीये गुर्जरीरागः तथा मण्ठतालः। तद्वत् तृतीयादयः। काव्यस्यास्य प्रत्येकमपि सर्गः पृथक् नामभिः अभिधीयते। सामोददामोदरेति प्रथमः अक्लेशकेशवेति द्वितीयः एवं तृतीयादयः।

**टीकाकारस्य परिचयः**

गीतगोविन्दोपरि बहवः टीकाकाराः नैकाः टीकाः रचितवन्तः। तेषु प्रस्तुतटीकायाः लेखकः चिदानन्दभिक्षुः। अयं टीकाकारः अष्टादशशतकीयः। अस्य जन्मबंशपरिचयेऽपि महान् शोधः आवश्यकः। परन्तु टीकायाः अन्तिमश्लोकात् ज्ञायते अयं बैष्णवः स्यात्।

अन्तर्यत्रा नियुक्तेन चिदानन्देन भिक्षुणा।

रचितं कृष्णतुष्ट्यर्थं गीतगोविन्दटिप्पणम्॥

प्रीणातुभगवांस्तेन विश्वोरूपो जगत्पतिः।

हृषीकेशोब्रजावास गोपीमंडलमंडनः॥[४]

किन्तु भिक्षुरित्युपनाम दृष्ट्वायं बौद्धेत्यपि संदेहः उत्पद्यते। किन्तु सांख्यदार्शनिकस्य विज्ञानभिक्षोः अप्युपनाम भिक्षुः तस्मादित्यपि अनुमीयते यत् सांख्यपरम्परायामपि काचित् भिक्षुपरम्परा स्यात्। यस्याम् अस्य टीकाकारस्य आविर्भावोऽभवत्।

**गीतगोविन्दटीकायाः परिचयः**

चिदानन्दभिक्षुकृता इयं टीका साम्प्रतमप्रकाशितास्ति। इयं टीकामधिकृत्य मया 2021-22 तमे वर्षे शोधकार्यं प्रारब्धम्। टीकेयं भण्डारकर-प्राच्यविद्याशोधसंस्थानतः मया सम्प्राप्ता। अस्यां टीकायां त्रिसप्ततिः पत्राणि सन्ति। अस्याः लिपिः भवति देवनागरी। अस्यां मातृकायां गीतगोविन्दस्थपद्यानि तथा तदुपरिवर्त्तमाना टीका वर्त्तते। यत्र गीतगोविन्दस्थसर्वेषां पद्यानां व्याख्यानं चिदानन्देन विहितम्।

**लौकिकन्यायस्य परिचयः**

न्यायपदेन युक्तिः बोध्यते। लोके प्रयुक्तः न्यायः लौकिकन्यायः। लौकिकन्यायः भवति तादृशः नीतिवाक्यानि येषां प्रयोगः दैनन्दिनजीवनाचरणे लोकयात्रायां च सर्वदा भवति। अतः सामान्यतः लौकिकन्यायः भवति सामाजिकरूपेणगठिता एका स्वतःस्फूर्तविचारप्रणाली। बङ्गभाषया इयं प्रणाली वागधारानाम्नाभिधीयते। तथैव हिन्दिभाषया प्रणालीयं लोकोक्तिः तथा आंलभाषया Folk Justice नाम्ना कथ्यते। दर्शनादिशास्त्रेषु विचारान् सरलरीत्या ज्ञापयितुं देहलीदीप-अरण्यरोदन-कदम्बगोलकादिन्यायानां प्रयोगः नितरां दृश्यते।

**शोधप्रविधिः**

प्रस्तुताध्ययनस्य प्रकृतिः आलोचनात्मिकास्ति। यतो हि अत्र चिदानन्दभिक्षुकृतगीत-गोविन्दटीकायां नैकेषु स्थलेषु विषयं सरलरीत्या ज्ञापयतुं ग्रन्थकारः नैकान् लौकिकन्यायप्रयोगानुल्लिखितवान्। तेषामेव प्रयोगानां समालोचनमत्र विधास्यते तदर्थमत्र समालोचनात्मिकां शोधप्रविधिमाश्रयामो वयम्।

**गीतगोविन्दटीकायामुल्लिखितलौकिकन्यायप्रयोगानामनुशीलनम्**

प्रस्तुतटीकायाः टीकाकारः गीतगोविन्दस्य विभिन्नं स्थलं व्याख्यातुकामः लौकिकन्यायान् प्रयुक्तवान् तेषामालोचनं साम्प्रतं विधीयते। यथा प्रथमसर्गस्थस्य गीतगोविन्दाधिकारीनिरूपकस्य यदिश्रीहरीत्याख्यस्य पद्यस्य व्याख्यानावसरे कथयति यत् सर्वेऽपि पुरुषार्थाः परमपुरुषार्थे एवान्तर्भवति। एवमिमं विषयं सरलरीत्या ज्ञापयितुं टीकाकारः "सर्वं पदं हस्तिपदे निमग्नमि"त्याख्यं लौकिकन्यायं प्रयुक्तवान्। अस्यार्थस्तु सर्वेषां पदां यथा हस्तिपदे अन्तर्भावः भवति। तथैव कश्चिद्वृहच्छिद्धान्तः सर्वान् लघुसिद्धान्तान् स्वस्मिन्नन्तर्भावयति। तथैवात्र धर्मार्थकाममोक्षात्मकपुरुषार्थचतुष्टयानामेकस्मिन् परमपुरुषार्थात्मके भगवत्प्रीतावन्तर्भावः भवतीति तात्पर्यम्। क्रमेणैव प्रथमसर्गे द्वितीयगीतसमापनानन्तरं वसन्तेत्याद्यष्टपद्याः व्याख्यानावसरे टीकाकारः प्रस्तावयति। यत् राधया सह गच्छन्ती काचन सखी राधामुक्तवती। अत्र सखीवचनमुद्दिश्य टीकाकारः नापृष्टः कस्यचिद्ब्रूयादि[५]ति न्यायं प्रायुञ्जत्। न्यायमिदं महाभारतमनुस्मृतादिशास्त्रेषु निबद्धं वर्त्तते। तद्यथा

नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छतः।

जानन्नपि हि मेधावी जडवल्लोक आचरेत्।।[६]

अस्यार्थस्तु अपृष्टः कस्यचिन्न ब्रूयात्। तथैवान्यायेन पृच्छतः आपि न ब्रूयादिति। अस्मिन्नेव स्थले टीकाकारः पुनरेकं न्यायमुल्लिखति "अपृष्टापि तद्ध्यसनपरिहाराय ब्रूयादि[७]"ति। इत्थं प्रकारेण टीकाकारः द्वितीयसर्गस्य प्रारम्भिकश्लोकव्याख्यानावसरे राधायाः कृष्णात्परावृत्यवक्रगमनजनितदुःखमीर्षां च ज्ञापयितुं समानशीलव्यसनेषु सख्यमिति न्यायमाश्रयति। इयं पङ्क्तिः पञ्चतन्त्रस्थमित्रभेदात् संगृहीता। हितोपदेशोक्तं सम्पूर्णं पद्यं भवति-

मृगा मृगैः सङ्गमुपव्रजन्ति

गावश्च गोभिस्तुरगास्तुरङ्गैः।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः

समानशीलव्यसनेषु सख्यम्॥[८]

अस्यार्थस्तु सर्वे प्राणिनः समानस्वभावाचारयुक्तैः सह एव सख्यमाचरन्ति। यथा मृगाः मृगैरेवोपव्रजन्ति गावः गोभिः सह। मुर्खाः अपि मुर्खैः सह एवं पण्डिताः पण्डितैः सह व्यवहरन्ति।

**उपसंहारः**

बङ्गभाषया यथा वाग्धाराप्रयोगमाध्यमेन वर्णितविषयः नितरां सुगमः भवति। तथैवात्रापि लौकिकन्यायप्रयोगमाध्यमेन ग्रन्थकर्तुः टीकाकर्तुश्चाभिव्यक्तिः सम्यग्रूपेण प्रस्फुटिता भवति। तदर्थमेतेषां लौकिकन्यायानां प्रयोगेन टीकाकारः टीकायाः मानवर्धनं कृतवान्। तथा च एतेषां प्रयोगानां माध्यमेन पाठकानां विषयावगमे सुकरता स्यादिति वक्तुं शक्यते।

**सन्दर्भाः**

१. अग्निपुराणम्, (अ.३९९, श्लोक१०-११)
२. काव्यालंकारः१/५
३. काव्यालंकारः,१/४
४. गीतगोविन्दटीका-पाण्डुलिपिः पृ. १३५
५. गीतगोविन्दटीका- पाण्डुलिपिः पृ.२०
६. महाभारतम्, शान्तिपर्वम्, २८७/३५
७. गीतगोविन्दटीका- पाण्डुलिपिः पृ.२०
८. पञ्चतन्त्रम्, मित्रभेदः, श्लोक-३०५

**सहायकग्रन्थाः**

**१.** अग्निपुराणम् — वेदव्यासः, चौखाम्वा सं. सी., वाराणसी,उत्तरप्रदेशः।
**२.** गीतगोविन्दटीका(पाण्डुलिपिः) — जयदेवः, चिदानन्दभिक्षुः, भण्डारकरप्राच्यविद्याशोधसंस्थानम्, पुने, महाराष्ट्रम्।
**३.** गीतगोविन्दम् — जयदेवः, रसिकमोहनविद्याभूषणः, नलिनीप्रेस, कोलकाता।
**४.** महाभारतम्(शान्तिपर्वम्) — श्रीकृष्णद्वैपायनवेदव्यासः, श्रीमद् हरिदाससिद्धान्तवागीशभट्टाचार्यः, विश्ववानिप्रकाशनम्, कोलकाता, बं. १४००।
**५.** काव्यालंकारः — भामहः, Sankararamashastri, balmanora mapress, madras,1956.
**६.** संस्कृतशोधप्रविधिः — डॉ.सत्यनारायण आचार्यः,राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः,आन्ध्रप्रदेशः,२०१२।